20530048

# SANSKRIT

***Maximum Marks: 80***
***Time Allotted: Three Hours***
***Reading Time: Additional Fifteen Minutes***

## Instructions to Candidates

1. You are allowed an **additional fifteen minutes** for **only** reading the question paper.
2. You must **NOT** start writing during reading time.
3. This question paper has **4 printed pages**.
4. There are **three** sections in the paper: **A, B and C**.
5. There are **eleven questions** in the paper.
6. Answer ***all*** questions in **Sections A** and **B** and **any four** questions in **Section C**.
7. The intended marks for questions are given in brackets [ ].

## Instruction to Supervising Examiner

1. Kindly read **aloud** the Instructions given above to all the candidates present in the examination hall.


***© Copyright reserved.***

## SECTION A – 18 MARKS

*Answer **all** questions.*

**Question 1**

(i) Disjoin Sandhis of *any three* words from the following. **[3]**

अधोदत्तानां केषाञ्चित् त्रयाणां शब्दानां सन्धिविच्छेदं कुरुत।

नास्त्येतत् , हरिरपि, तयागच्छन्ति , अजन्त, प्रेजते

(ii) Expound *any three* of the following words, giving the names of the compound. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां समस्तपदानां विग्रहं कृत्वा समासस्य नाम अपि लिखत।

निर्मक्षिकम् , प्राचार्यः , मनोविकारः , नीलकमलम् , चन्द्रशेखरः

(iii) Split *any three* of the following words. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां पदानां प्रकृतिप्रत्ययविभागं कुरुत।

क्रेतुम्, श्रव्य, करणीय , प्रणम्य , गत

(iv) Change the voice of *any three* of the following sentences. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां वाक्यानां वाच्यं परिवर्तयत।

(a) तैः विषयः न अवगतः।

(b) अहं तं जानामि।

(c) युष्माभिः दानं दीयते।

(d) त्वया फलं खादितम्।

(e) भवान् मां पाठयति।

**Question 2** **[6]**

Translate the following passage into Sanskrit.

अधोलिखितस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कुरुत।

Last year, our school decided to start a new environmental project. The aim of this project was to make the students aware of the importance of protecting nature. Every week, a group of students visited nearby parks, rivers and forests. They cleaned the areas, planted trees and spoke to the local people about environmental pollution. The teachers also encouraged the students to reduce the use of plastic and save water at home. Because of this project, many students developed a deep love for nature. They understood if we do not protect our environment today, we might cease to exist tomorrow.

## SECTION B – 34 MARKS

*Answer **all** questions.*

### Question 3

Translate the following passages into English.

अधोलिखितयोः गद्यांशयोः आङ्गलभाषया अनुवादं कुरुत।

(i) अथ महाश्वेता कादम्बरीम् अनामयं पप्रच्छ। सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेव लज्जमाना कृच्छ्रादिव कुशलम् आचचक्षे। मुहुर्तापगमे च महाश्वेता ताम्बूलदानोद्यतां ताम् अभाषत्- "सखि कादम्बरि, सर्वाभिरस्माभिः अयम् अभिनवागतः चन्द्रापीडः आराधनीयः। तदस्मै तावत् दीयताम्" इति। इत्युक्ता सा शनैः अव्यक्तमिव "सखि, लज्जेहऽम् अनुपजातपरिचया गल्भ्येनानेन। गृहाण त्वमेव अस्मै प्रयच्छ" इत्युवाच। पुनः पुनः अभिधीयमाना च तया ग्राम्येव चिरात् दानाभिमुखं मनश्चक्रे। महाश्वेतामुखात् आकृष्टदृष्टिरेव वेपमानाङ्गयष्टिः प्रसारयामास च ताम्बूलगर्भं हस्तपल्लवम्। चन्द्रापीडस्तु स्वभावपटलं धनुर्गुणाकर्षणकृतकिणश्यामलं पाणिं प्रसार्य ताम्बूलं प्रतिजग्राह। अथ सा गृहीत्वा अपरं ताम्बूलं महाश्वेतायै प्रायच्छत्। [6]

(ii) चन्द्रापीडोऽपि तत्रैव शिलातले, निरभिमानताम् अतिगम्भीरतां च कादम्बर्याः, निष्कारणवत्सलतां महाश्वेतायाः, अतिसमृद्धिं च गन्धर्वराजलोकस्य मनसा भावयन्, केयूरकेण संवाह्यमानचरणः, क्षणादिव क्षणदां क्षपितवान्। अथ समुद्गते सवितरि शिलातलात् उत्थाय चन्द्रापीडः प्रक्षालितमुखकमलः, कृतसन्ध्यानमस्कृतिः गृहीतताम्बूलः "केयूरक! विलोकय, देवी कादम्बरी प्रबुद्धा वा न वा ? क्व सा तिष्ठति ?" इत्यवोचत्। गतप्रतिनिवृत्तेन च तेन "देव! मन्दरप्रासादस्य अधस्तात्, अङ्गणसौधवेदिकायां महाश्वेतया सह अवतिष्ठते" इत्यावेदिते, ताम् आलोकितुम् आजगाम्। दृष्ट्वा च कादम्बरीं समुपसृत्य, तस्यामेव सुधावेदिकायां विन्यस्तम् आसनं भेजे। [6]

### Question 4

Translate the following verses into English.

अधोलिखितयोः पद्यांशयोः आङ्गलभाषया अनुवादं कुरुत।

(i) हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः। [7]
भुजङ्गपिहितद्वारं पातालमधितिष्ठति॥ ८०
सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।
आराधय सपत्नीकः प्रीता कामदुघा हि सा॥ ८१

(ii) इति वादिन एवास्य होतुराहुतिसाधनम्। [7]
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात्॥ ८२
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्॥ ८३

**Question 5**

Explain the following with reference to the context.

अधोलिखितयोः उद्धरणयोः सन्दर्भप्रसङ्गाभ्यां सह व्याख्यां कुरुत।

(i) राजपुत्र ! किमनेन मम मन्दभाग्यायाः जन्मनः प्रभृति वृत्तान्तेन श्रुतेन ? **[4]**

(ii) "अहो कल्याणपरम्परा" इत्यभिधाय शुकनासभवनं गत्वा द्विगुणतरं उत्सवम् अकारयत्। **[4]**

## SECTION C – 28 MARKS

*Answer **any four** questions.*

**Question 6** **[7]**

कालिदासः रघुवंशस्य महत्त्वं कथं प्राकाशयदिति विस्तरेण विवृणुत।

**Question 7** **[7]**

रघुवंशस्य प्रथमे सर्गे कालिदासेन लिखितं दिलीप-सुदक्षिणयोः चरित्रं सोपमया विस्तारयत।

**Question 8** **[7]**

महर्षेः वशिष्ठस्य आश्रमं प्राप्य राजा दिलीपः स्वभावान् तस्य पुरतः कथं प्रकटितवान् ?

**Question 9** **[7]**

चन्द्रापीडः केयूरकं रहसि नीत्वा किं पप्रच्छ ? सोपि कादम्बर्याः दशां कथम् अवर्णयत् ?

**Question 10** **[7]**

सरस्सलिलात् आगतं कपिञ्जलं दृष्ट्वा महाश्वेता तं किमपृच्छत् ? तेनापि किमुक्तं ? विस्तारयत।

**Question 11** **[7]**

जाबालेः आश्रमस्य ऋषयः हारीतस्य हस्ते शुकं दृष्ट्वा किमपृच्छन् ? सोपि किं प्रत्यवादीत् ? लिखत।



SEAL
205300048 205300048 205300048